# shrIgurustotram

# શ્રીગુરુસ્તોત્રમ્

## Document Information

Text title : gurustotra from bRihatpAkaM haMsa saMhitA

File name : gurustotrambRihatpAkamhaMsa.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : Traditional

Transliterated by : DPD

Proofread by : DPD

Source : bRihatpAkaM haMsya saMhitAntrArgatam

Latest update : January 31, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીગુરુસ્તોત્રમ્

બૃહત્પાકં હંસ્યાં સંહિતાયાં

જ્ઞાનાત્માનં પરમાત્માનં દાનં ધ્યાનં યોગં જ્ઞાનમ્ ।
જાનન્નપિ સુન્દરિમાતર્ન ન ગુરોરધિકં ન ગુરોરધિકમ્ ॥ ૧॥

પ્રાણં દેહં ગેહં રાજ્યં ભોગં મોદા ભક્તિં પુત્રમ્ ।
મન્યે મિત્રં વિતકલત્રં ન ગુરોરધિકં ન ગુરોરધિકમ્ ॥ ૨॥

વાનપ્રસ્થં યતિવિધધર્મં પારમહંસ્યં ભિક્ષુક ચરિતમ્ ।
સાધો સેવા બહુસુરભક્તિર્ન ગુરોરધિકં ન ગુરોરધિકમ્ ॥ ૩॥

વિષ્ણો ભક્તિઃ પૂજન ચરિતં વૈષ્ણવસેવા માતરિ ભક્તિમ્ ।
વિષ્ણોરિવ પિતૃસેવનયોગો ન ગુરોરધિકં ન ગુરોરધિકમ્ ॥ ૪॥

પ્રત્યાહારં ચેન્દ્રિયજપતાપ્રાણાયામંન્યાનિર્વિધાનમ્ ।
ઇષ્ટે પૂજાજપતપભક્તિર્ન ગુરોરધિકં ન ગુરોરધિકમ્ ॥ ૫॥

કાલી દુર્ગા કમલા ભુવના ત્રિપુરામીમાં બગલાપૂર્ણા ।
શ્રીમાતઙ્ગી ધૂમા તારા એતા વિધાત્રિભુવનસ્તરા
ન ગુરોરધિકં ન ગુરોરધિકમ્ ॥ ૬॥

માત્સ્યં કૌર્મં શ્રીવારાહં નરહરિરૂપં વામનચરિતમ્ ।
અવતારાદિકમન્યત્ સર્વં ન ગુરોરધિકં ન ગુરોરધિકમ્ ॥ ૭॥

શ્રીરઘુનાથં શ્રીયદુનાથં શ્રીભૃગુદેવં બૌદ્ધં કલ્કિમ્ ।
અવતારાનિતિ દશકં મન્યે ન ગુરોરધિકં ન ગુરોરધિકમ્ ॥ ૮॥

ગઙ્ગા કાશી કાઞ્ચી દ્વારા માયાઽયોધ્યાઽવના મથુરા ।
યમુના રેવા પરતરતીર્થં ન ગુરોરધિકં ન ગુરોરધિકમ્ ॥ ૯॥

ગોકુલ ગમનં ગોપુરરમણં શ્રીવૃન્દાવનમધુપુર ભટનમ્ ।
એતત્ સર્વં સુન્દરિમાતર્ન ગુરોરધિકં ન ગુરોરધિકમ્ ॥ ૧૦॥

તુલસીસેવા હરિહરભક્તિર્ગઙ્ગાસાગરસઙ્ગમમુક્તિમ્ ।
કિમપરમધિકં કૃષ્ણોભક્તિરેતત્સર્વં
સુન્દરિમાતર્ન ગુરોરધિકં ન ગુરોરધિકમ્ ॥ ૧૧॥

એતત્ સ્તોત્રં પઠતિ ચ નિત્યં મોક્ષજ્ઞાની સોઽયતિ ધન્યઃ ।
બ્રહ્માણ્ડાન્તર્યદ્યદ્ જ્ઞેયં  સર્વં ન ગુરોરધિકં ન ગુરોરધિકમ્ ॥ ૧૨॥

॥ ઇતિ બૃહત્પાકં હંસ્યાં સંહિતાયાં શ્રીશિવપાર્વતી
સંવાદે શ્રીગુરુસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by DPD

*shrIgurustotram*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*